समानयद्दर्शनीयं तत्तदत्र स विश्वसृत् ।"
ब्रह्मा । यथा, भागवते । ६ । १४ । ८ ।
"निर्व्विदितोऽथाङ्गिरसा सोमं निर्भर्त्तुस्त्व विश्व-
सृत् ।
मारां सभर्त्त्रे प्रायच्छद्दत्तर्वृत्तीमवेत्यतिः ।")
विश्वकेतुः, पुं, (विश्वमेव केतुर्यस्य । विश्वव्यापी वा केतुर्यस्य ।) अनिरुद्धः । इत्यमरः ॥
विश्वक्, व्य, सर्व्वतः । इत्यमरटीका ॥
विश्वक्सेनः, पुं, विष्णुः । इत्यमरटीकायां भरतः ॥ त्रयोदशमनुः । यथा,—
"मनुर्भूतेः सुतस्तद्वत् भौत्यो नाम भविष्यति ।
ततस्तु मेरुसावर्णब्रह्मसूनुर्मनुः स्मृतः ॥
ऋतुश्च ऋतुधामा च विश्वक्सेनो मनुस्तथा ॥
अतीतानागताश्चैते मनवः परिकीर्त्तिताः ॥"
इति मात्स्ये ९ अध्यायः ॥ * ॥
विष्णोर्निर्म्माल्यधारिदेवता । यथा,—
"निर्म्माल्यधारी विष्णोस्तु विश्वक्सेनश्चतुर्भुजः ।
शङ्खचक्रगदापाणिर्दीर्घश्मश्रुर्जटाधरः ॥
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थितः ।
व-तृतीयस्वरान्तेन संयुतो बिन्दुनेन्दुना ॥
कीर्त्तितस्तस्य मन्त्रोऽयं तेन तं परिपूजयेत् ।
विसर्ज्जनं तथा विष्णोरैशान्यां परिकल्पयेत् ॥"
इति कालिकापुराणे ८२ अध्यायः ॥
(क्वचित् विश्वक्सेन इति पाठोऽपि दृश्यते ॥)
विश्वक्सेना, स्त्री, प्रियङ्गुवृक्षः । इति केचित् ॥ (केचित् द्वितीयशकारस्थाने सकारं पठन्ति ॥ यथा,—
"विश्वक्सेना प्रियाकान्ता प्रियङ्गुः फलिनी फली ॥"
इति वैद्यकरत्नमालायाम् ॥
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया ।
गुन्द्रागुन्द्रफला श्यामा विश्वक्सेनाङ्गनाप्रिया"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विश्वगः, पुं, (विश्वं गच्छतीति । गम + डः ।) ब्रह्मा । इति हेमचन्द्रः ॥
विश्वगन्धं, क्ली, (विश्वे सर्व्वस्थाने गन्धो यस्य ।) बोलम् । इति राजनिर्घण्टः ॥
विश्वगन्धः, पुं, (विश्वे सर्व्वदेशे गन्धो यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥
विश्वगन्धा, स्त्री, (विश्वेषु समस्तपदार्थेषु मध्ये गन्धा गन्धविशिष्टा । क्षितावेव गन्ध इति न्यायादस्यास्तथात्वम् ।) पृथिवी । इति शब्दचन्द्रिका ॥
विश्वगोप्ता, [ऋ] पुं, (विश्वस्य गोप्ता ।) विष्णुः । इन्द्रः । इति केचित् ॥ (विश्वपालके, त्रि । यथा, हरिवंशे । २५१ अध्याये ।
"त्वमेव विश्वगोप्तासि विश्वम्भर पवित्रमसि ॥")
विश्वग्रन्थिः, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥
विश्वग्वायुः, पुं, (विश्वग्गतो वायुः ।) सर्व्वतोगामिपवनः । अस्य गुणाः ।
"विश्वग्वायुरनायुष्यं प्राणिनां नैकदोषकृत् ।
स नर्त्तुशिङ्क्को हन्ता सर्व्वोत्पातपुरःसरः ॥"
इति राजवल्लभः ॥

विश्वद्, [च्] त्रि, सर्व्वत्रगामी । विश्वं अञ्चति इत्यर्थे क्विप्प्रत्ययेन निष्पन्नमिदम् ॥
विश्वङ्करः, पुं, (विश्वं सर्व्वं करोति प्रकाशयतीति । कृ + बाहुलकात् टः द्वितीयाया अलुक् च ।) चक्षुः । इति केचित् ॥
विश्वचक्रं, क्ली, (विश्वतः सर्व्वत्र चक्रं यस्य ।) महादानविशेषः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
विश्वचक्रमिति ख्यातं सर्व्वपातकनाशनम् ॥
तपनीयस्य शुद्धस्य विश्वचक्रन्तु कारयेत् ।
श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ॥
तस्यार्द्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशत्पलादूर्द्ध्वमशक्तोऽपि निवेदयेत् ॥
षोड़शारं ततश्चक्रं भूमिनेम्यष्टकावृतम् ।
नाभिपद्मे स्थितं विष्णुं योगारूढ़ं चतुर्भुजम् ॥
शङ्खचक्रस्य पार्श्वे तु देव्यष्टकसमावृतम् ।
द्वितीयावरणे तद्वत् पूर्व्वतो जलशायिनम् ॥
अत्रिर्भृगुर्वशिष्ठश्च ब्रह्मा काश्यप एव च ।
मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश ॥
तृतीयावरणे गौरी मातृभिर्वसुभिर्युता ।
चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ॥
पञ्चमे पञ्चभूतानि रुद्राश्चैकादशैव तु ।
लोकपालाष्टकं षष्ठे दिङ्मातङ्गास्तथैव च ॥
सप्तमेऽस्त्राणि सर्व्वाणि मङ्गल्यानि च कारयेत्
अन्तरान्तरतो देवान् विन्यसेदष्टमे पुनः ॥
तुलापुरुषवत् शेषं समन्तात् परिकल्पयेत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥
विश्वचक्रं ततः कुर्य्यात् कृष्णाजिनतिलोपरि ।
तथाष्टादश धान्यानि रसाश्च लवणादयः ॥
पूर्णकुम्भाष्टकञ्चैव वस्त्राणि विविधानि च ।
माल्येक्षुफलरत्नानि वितानं चापि कल्पयेत् ॥
ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो गृही ।
होमाधिवासनान्ते तु गृहीतकुसुमाञ्जलिः ॥
इममुच्चारयेन्मन्त्रं त्रिः कृत्वा तु प्रदक्षिणम् ।
नमो विश्वमयायेति विश्वचक्रात्मने नमः ॥
परमानन्दरूपि त्वं पाहि नः पापकर्द्दमात् ।
तेजोमयमिदं यस्मात् सदा पश्यन्ति योगिनः ॥
हृदि तत् त्रिगुणातीतं विश्वचक्रं नमाम्यहम् ।
वासुदेवे स्थितञ्चक्रं चक्रमध्ये च माधवम् ॥
अन्योन्याधाररूपेण प्रणमामि स्थिताविह ।
विश्वचक्रमिदं यस्मात् सर्व्वपापहरं परम् ।
आयुधञ्चाधिवासञ्च भवादुद्धर मामितः ॥
इत्यामन्त्र्य च यो दद्यात् विश्वचक्रममत्सरः ।
विमुक्तः सर्व्वपापेभ्यो विष्णुलोके महीयते ॥
वैकुण्ठलोकमासाद्य चतुर्ब्बाहुः सनातनः ।
सेव्यतेऽप्सरसां संघैस्तिष्ठेत् कल्पशतत्रयम् ॥
प्रणमेद्वाथ यः कुर्य्यात् विश्वचक्रन्दिने दिने ।
तस्यायुर्व्वर्द्धते नित्यं लक्ष्मीश्च विपुला भवेत् ॥
इति सकलजगत्सुराधिवासं
वितरति यस्तपनीयषोड़शारम् ।

हरिभवनमुपागतः स सिद्धै-
श्चिरमधिगम्य नमस्यते शिरोभिः ॥
असुदर्शनतां प्रयाति शत्रो-
र्मदनसुदर्शनताञ्च कामिनीनाम् ।
समुदर्शनकेशवानुरूपं
कनकसुदर्शनदानदग्धपापः ॥
कृतगुरुदुरितारिषोड़शारं
प्रवितरणप्रवराकृतिं मुरारेः ।
अभिभवति भवोद्भवानि भित्त्वा
भवमभितो भवने भवानि भूयः ॥"
इति मात्स्ये महादानानुकीर्त्तने विश्वचक्रप्रदानिको नाम २५६ अध्यायः ॥
विश्वचक्रात्मा, [न्] पुं, (विश्वचक्रं ब्रह्माण्डमेव आत्मा स्वरूपं यस्य ।) विष्णुः । यथा,—
"नमो विश्वमयायेति विश्वचक्रात्मने नमः ।
परमानन्दरूपी त्वं पाहि नः पापकर्द्दमात् ॥"
इति मात्स्ये २५६ अध्यायः ॥
विश्वजित्, पुं, (विश्वं जयतीति । जि + क्विप् । तुक् च ।) यज्ञभेदः । इति जटाधरः ॥ (यथा, रघुः । ५ । १ ।
"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥")
न्यायविशेषः । यथा । यत्तु फलाश्रुतेर्नित्यत्वमभिहितं तत् फलाश्रुतौ विश्वजिन्न्यायात् स्वर्गः कल्प्यते । इत्यनेन विरुद्धमिति । स च न्यायो यथा । विश्वजिता यजेत इत्यादि श्रूयते । इत्येकादशीतत्त्वम् ॥ वरुणपाशः । इति केचित् ॥ (अग्निविशेषः । यथा, महाभारते । ३ । २१८ । १६ ।
"यस्तु विश्वस्य जगतो बुद्धिमाक्रम्य तिष्ठति ।
तं प्राहुरध्यात्मविदो विश्वजिन्नामपावकम् ॥"
दानवविशेषः । यथा, तत्रैव । १२ । २२७ । ५१ ।
"विश्वजित् प्रतिरूपश्च वृषान्तो विष्करो मधुः ॥"
दृढ़रथस्य पुत्रः । यथा, हरिवंशे । ३१ । ५१ ।
"आसीद्दृढ़रथस्यापि विश्वजिज्जनमेजय ॥"
सत्यजित्तनयः । यथा, तत्रैव । २० । १९ ।
"सत्यजित्तनयस्तस्य विश्वजित्तस्य चात्मजः ॥"
विश्वजयिनि, त्रि । यथा, भागवते । ७ । ४ । ७ ।
"सर्व्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ॥")
विश्वतः, [स्] व्य, (विश्व + तसिल् ।) सर्व्वतः । इत्यमरटीका ॥ (यथा, भागवते । १० । ३१ । ३ ।
"वृषमयात्मजाद्विश्वतो भयात्
ऋषभ ते वयं रक्षिता मुहुः ॥")
विश्वदेवः, पुं, (विश्वं दीव्यतीति । दिव + अच् ।) गणदेवताविशेषः । इत्यमरटीका ॥
"विश्वदेवौ क्रतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ।
नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ॥
नवान्नालम्भने देवौ कामकालौ सदैव हि ।
अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ ।